लेपनम् २ पारी ३ दोहः ४ दोहनम् ५। इति शब्दरत्नावली।

दोहलः, पुं, (दोहमाकर्षं लातीति। ला+"आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) दोहदः। इच्छा। इति शब्दार्थकल्पतरुः॥ (यथा, मालविकाग्निमित्रनाटके। ८।४७।
"अशोक! यदि सद्य एव मुकुलैर्न सम्पत्स्यते
मुधा वहसि दोहलं ललितकामिसाधारणम्॥")

दोहलवती, स्त्री, (दोहलोऽस्त्यस्या इति मतुप्। मस्य वः। ङीप्।) दोहदवती। इति शब्दार्थकल्पतरुः॥

दोहली, स्त्री, (दोहं लातीति। ला+कः। गौरादित्वात् ङीष्।) अशोकवृक्षः। इति राजनिर्घण्टः॥ (अशोकशब्देऽस्या विवरणं ज्ञेयम्॥)

दोहापनयः, पुं, (दोहं दोहनमपनयति खनिःसरणेनेति। अप+नी+अच्।) दुग्धम्। इति त्रिकाण्डशेषः॥

दोहीयान्, [स्] त्रि, (अयमनयोरतिशयेन दोग्धा। "तुश्छन्दसि।" ५।३।५६। इति ईयसुन्। "तुरिष्ठेमेयःसु।" ६।४।१५४। इति तृणब्दस्य लोपः।) अतिशयदोहकः॥

दोह्यं, त्रि, (दुह्यते इति। दुह्+ण्यत्।) दोहनीयम्। दुग्धम्। दोग्धव्यम्। इति व्याकरणम्॥ (दुह्यतेऽस्या इति। गोमहिष्यादि। इति मिताक्षरा॥ यथा, याज्ञवल्क्ये। २। १८०।
"दशैकपञ्चसप्ताहमासत्र्यहार्द्धमासिकम्।
बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम्॥")

दौःसाधिकः, पुं, (दुर्द्दुःसाधः कर्म्म तत्र नियुक्तः। ठक्।) द्वाःस्थितः। द्वारपालः। इति त्रिकाण्डशेषः॥

दौकूलं, त्रि, (दुकूलेन परिवृतो रथ इति। "परिवृतो रथः।" ४। २। १०। इति अण्।) दुकूलेनावृतरथादि। इत्यमरटीकायां भरतः॥

दौत्यं, क्ली, (दूतस्य भावः कर्म्म वा। ष्यञ्।) दूतत्वम्। दूतस्य भावः। दूतस्य कर्म्म। इत्यमरटीकायां भरतः॥ (यथा, हरिवंशे। १७२। १८।
"दौत्यञ्च तत् कृतं घोरे विग्रहे जनमेजय!॥")

दौरात्म्यं, क्ली, दुर्निन्दित आत्मा यत्नः धृतिः बुद्धिः स्वभावः शरीरं वा यस्य स दुरात्मा। तस्य भावकर्म्मार्थे ष्यप्रत्ययः। (ष्यञ्।) दुरात्मनो भावः। दुरात्मनः कर्म्म। (यथा, महाभारते। २। १५। ७।
"शङ्किताः स्म महाभाग! दौरात्म्यात् तस्य चानघ।॥")

दौर्गन्ध्यं, क्ली, (दुर्दुष्टो गन्धोऽस्य दुर्गन्धः। ततो भावे ष्यञ्।) दुर्गन्धता। (यथा, महाभारते। ३। २६०। १३।
"न संस्वेदो न दौर्गन्ध्यं पुरीषं मूत्रमेव वा॥")
तन्नाशकतैलं यथा,—
"चन्दनं कुङ्कुमं मांसी कर्पूरी जातिपत्रिका।
जातीकक्कोलपूगानां लवङ्गस्य फलानि च॥
अगुरुश्चैरकाश्मर्यं कुष्ठं तगरनालिका।
गोरोचना प्रियङ्गुश्च चोलं मदनकं नखम्॥
सरलः सप्तपर्णश्च लाक्षा चामलकी तथा।
कर्चूरकः पद्मकश्च एतैस्तैलं प्रसाधितम्॥
प्रस्वेदमलदौर्गन्ध्यकण्डूकुष्ठहरं परम्॥"
इति गारुडे १९८ अध्यायः॥

दौर्ग्यं, क्ली, दुर्गवृत्तिधर्म्मः। दुर्गसम्बन्धि। दुर्गस्य भावः दुर्गस्येदं वेत्यर्थे ष्यप्रत्ययः। (ष्यञ्।)॥

दौर्ज्जन्यं, क्ली, दुर्ज्जनस्य भाव इदं वेत्यर्थे ष्यप्रत्ययः। (ष्यञ्।) दुर्ज्जनत्वम्। (यथा, महाभारते। ६। १८। ७६।
"तदिदं मम दौर्ज्जन्यं वालिशस्य महीयसि।
त्वमुमर्हति मातस्त्वं दिष्ट्या गर्भो स्वतोऽस्थितः॥")

दौर्ब्बल्यं, क्ली, दुर्ब्बलस्य भाव इत्यर्थे ष्यप्रत्ययः। (ष्यञ्।) दुर्ब्बलता। अल्पबलत्वम्। (यथा, मनुः। ८। १७१।
"अनादेयस्य चादानादादेयस्य च विवर्ज्जनात्।
दौर्ब्बल्यं ख्याप्यते राज्ञः स प्रेत्येह च नश्यति॥")

दौर्भागिनेयः, पुं, (दुर्भगाया अपत्यं पुमान्। दुर्भगा+"कल्याण्यादीनामिनङ् च।" ४। १। १२६। इति ढक् इनङादेशश्च।) दुर्भगापुत्त्रः। इति शब्दरत्नावली॥ दुर्भगायाः कन्या दौर्भागिनेयी॥

दौर्भाग्यं, क्ली, दुर्भगस्य दुर्भगाया वा भावः। (ष्यञ्। "हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य च।" ७। ३। १९। इत्युभयपदवृद्धिः।) दुर्भगत्वम्। यथा, ज्योतिस्तत्त्वे।
"भुक्त्वा पितृगृहे नारी भुङ्क्ते स्वामिगृहे यदि।
दौर्भाग्यं जायते तस्याः शपन्ति कुलदेवताः॥"
दुर्भाग्यमेव दौर्भाग्यम्। इति स्वार्थे ष्यप्रत्ययः॥

दौर्म्मनस्यं, क्ली, दुर्म्मनसो भावः (ष्यञ्)। दुःखनिबन्धनचित्तावसादः। इति चण्डीटीकायां नागोजीभट्टः॥ (यथा, मार्कण्डेये। ८१। २६।
"तेषां क्षते मे निःश्वासा दौर्म्मनस्यञ्च जायते॥")

दौर्व्वीणं, क्ली, (दूर्व्वाया इदम्। दूर्व्वा+खञ्।) दूर्व्वापर्णम्। दूर्व्वारसः। इति मेदिनी। णे,५३॥

दौर्हृदं, क्ली, (दुर्हृदो भावः। युवादित्वात् अण्। बाहुलकात् न द्विपदवृद्धिः।) इच्छा। दोहदम्। इति हेमचन्द्रः।३।२०५॥ ("लब्धदौर्हृदा हि वीर्य्यवन्तं चिरायुषञ्च पुत्त्रं जनयति।" इति सुश्रुते॥ दूषितहृदयत्वम्। यथा, महाभारते। ५। २९। १४।
"दुर्भाषिणो मन्युवशानुगस्य
कामात्मनो दौर्हृदे भावितस्य॥")

दौलेयः, पुं, (दुलेरपत्यमिति। "इतश्चानिञः।" ४। १। १२२। इति ढक्।) कच्छपः। इति हेमचन्द्रः। ४। ४१५॥

दौष्मिः, पुं, (दुष्मस्यापत्यम्। दुष्म+इञ्।) इन्द्रः। इति शब्दार्थकल्पतरुः॥

दौवारिकः, पुं, (द्वारि नियुक्तः। "तत्र नियुक्तः।" ४। ४। ६९। इति ठक्। ततः "द्वारादीनाञ्च।" ७। ३। ४। इति न वृद्धिः औ-आगमश्च।) द्वारक्षकः। (यथा, राजतरङ्गिण्याम्।५।२८।
"राजदौवारिकः श्रीमाञ्छूरस्यासीन्महोदयः।")
तत्पर्य्यायः। द्वाःस्थः २ क्षत्ता ३ दण्डी ४ वेत्रधरः ५। इति हलायुधः॥ प्रतीहारः ६ प्रतिहारः ७ दर्शकः ८ द्वारी ९ वेतालः १० द्वारपालकः ११ दौःसाधिकः १२ वर्त्तकण्ठः १३ गल्वाटः १४ दण्डपांशुलः १५। इति शब्दरत्नावली॥ द्वाःस्थितः १६ वेत्रधारकः १७ वर्त्तकण्ठकः १८ दण्डवासी १९। इति त्रिकाण्डशेषः॥ तस्य लक्षणं यथा,—
"प्रांशुः सुरूपो दक्षश्च प्रियवादी न चोद्धतः।
चित्तग्राहश्च सर्व्वेषां प्रतीहारो विधीयते॥"
इति मत्स्यपुराणम्॥
"इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः।
अप्रमादी सदा दक्षः प्रतीहारः स उच्यते॥"
इति चाणक्यम्। १०८॥

दौष्कुलेयः, त्रि, (दुष्कुलस्यापत्यम्। "दुष्कुलात् ढक्।" ४। १। १४२। इति ढक्।) दुष्कुलोद्भवः। निन्दितवंशजातः। दुष्कुलशब्दात् भवार्थे वा ष्यप्रत्ययः॥ (यथा, महाभारते। ३। १९३। २३।
"कुले जाताश्च म्रियन्ते दौष्कुलेयवशानुगाः॥")

दौष्मन्तिः, पुं, (दुष्मन्तस्यापत्यं पुमान्। दुष्मन्त+"अत इञ्।" ४। १। ९५। इति इञ्।) दुष्मन्तराजपुत्त्रः। स तु भरतराजः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते।१।७४।२।
"रूपौदार्य्यगुणोपेतं दौष्मन्तिं जनमेजय!॥")

दौहित्रः, पुं,स्त्री, (दुहितृ+"अनृष्यानन्तर्य्ये विदादिभ्योऽञ्।" ४। १। १०४। इति अञ्।) दुहितुरपत्यम्। इति हेमचन्द्रः। ३। २०८॥ तत्पर्य्यायः। कुतुपः २। इति शब्दरत्नावली॥
"त्रीणि श्राद्धे पवित्राणि दौहित्रं कुतुपस्तिलाः।
दौहित्रं खड्गमित्याहुस्तुरपत्यं दुहितुस्तिलाः॥
कपिलाया घृतञ्चैव दौहित्रमिति चोच्यते॥"
इति मार्कण्डेयपुराणम्॥
"पौत्त्रदौहित्रयोर्लोके विशेषो नास्ति कश्चन।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः॥"
इति दायभागः॥
दौहित्रोऽपि ह्यमुत्रैनं सन्तारयति पौत्त्रवदिति मनुः॥ तदुत्पत्तौ कन्यागृहे पितुर्भोजने दोषाभावो यथा,—
"कन्यायां ब्रह्मदेयायामभुञ्जन् सुखमश्नुते।
अथ भुञ्जति यो मोहात् भुक्त्वा स नरकं व्रजेत्॥
अप्रजायाश्च कन्याया न भुञ्जीयात् कदाचन।
दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि॥
महासत्त्वसमाकीर्णात् नास्ति ते नरकाद्भयम्॥
तीर्णस्त्वं सर्व्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि।
दौहित्रस्य तु दानेन नन्दन्ति पितरः सदा॥
यत्किञ्चित् कुरुते दानं तदानन्त्याय कल्पते॥
मातुः पितुश्च विज्ञेयं तच्छुभस्याभिगामिनः।
मातुः पितुर्हि रक्षस्य दौहित्रोऽर्हमवाप्नुते॥"
इत्याद्ये वह्निपुराणे कन्यादानमामाध्यायः॥*॥